International Journal of Multidisciplinary Horizon

**ISSN: 3049-2017**
IJMH 2024; 1(1): 06-08
© 2024 IJMH
www.themultijournal.com
Received: 24-02-2024
Accepted: 06-03-2024
Publish : 07-03-2024

**Debabrata Panda**
Research Scholar (Ph.D),
Department Of Sanskrit,
MSCB University, Takatpur,
Baripada

**Correspondence:**
**Debabrata Panda**
Research Scholar (Ph.D),
Department Of Sanskrit,
MSCB University, Takatpur,
Baripada

# व्याकरणशास्त्रदृष्ट्या कर्मकारकविमर्शः

**Debabrata Panda**

**प्रस्तावना-**

करोति क्रियाजनकत्वं कारकत्वमिति नागेशेन स्वीकृतम्। तच्च साक्षात् परम्परया च गृह्यते। करोति क्रियां निवर्त्तयति सम्पादयति अथवा कर्तृकर्मादिव्यपदेशानिति व्युत्पत्त्या एतादृशोऽर्थः आयाति। जन्यजनकभावघटितक्रियाकारकभावसम्बन्धेन क्रियान्वयीत्यर्थः। एवञ्च ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्य क्रियाजनकत्वाभावात् कारकत्वं नास्ति। किन्तु पुत्रस्य कारकत्वमस्ति। तेन ब्राह्मणस्य कुलालजनकस्येव अन्यथासिद्धत्वम्। अन्यथासिद्धत्वं नाम यस्य उपस्थित्यभावेऽपि (अवर्त्तमानेऽपि) क्रिया सम्पन्ना भवन्ति। अत्र ब्राह्मणं विनापि पृच्छा क्रिया सम्पन्ना भवति। वैयाकरणभूषणसारे सुबर्थनिर्णये कौण्डभट्टः सुप्प्रत्ययानामर्थनिरूपणाय तत्र वैयाकरणसिद्धान्तकारिकाम् उद्धरति-

**आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।**
**यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः।।**[1]

अस्यां कारिकायां भट्टोजिदीक्षितेन विभक्तिनाम् अर्थाः उक्ताः। द्वितीयातृतीयासप्तमीविभक्तिनाम् आश्रयोऽथ भवति पञ्चमीविभक्तेः अवधिः चतुर्थीविभक्तेः उद्देश्यः शेषषष्ठ्याश्च सम्बन्धोऽर्था भवति। इत्येवमर्थनिर्धारणं भाष्यप्रामाण्येन कृतमाचार्येण तद्यथा भाष्ये उक्तम्-

**सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङाम्।**
**प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा ।।**[2]

संख्या तथा कर्माद्यर्थाः सुप्तिङ्विभक्त्योः अर्थाः भवन्तीति भाष्ये स्पष्टमुक्तम। उक्तभाष्यमाधारीकृत्य एवं कारिकायां आश्रयाद्यर्थाः द्वितीयादिनामर्थाः इति प्रोक्तवान तत्र कर्मकारकविषयकविचारः प्रस्तुयते मया ।

**कर्मकारकविमर्शः**

दीक्षितेनोक्तम् कर्मणि द्वितीया इति सूत्रेण कर्मणि अर्थे द्वितीया विधीयते इति आश्रयार्थः तस्याः कथं सम्भवति इति चेत् उच्यते। द्वितीयाविधायकं सूत्रमस्ति **कर्मणि द्वितीया**[3] इति। किं नाम कर्म इति चेत् सूत्रमुक्तं पाणिनिना **कर्तुरीप्सिततमं कर्म**[4] इति। कर्तुः क्रियया ईप्सिततमं कारकं कर्मसञ्ज्ञं स्यादिति सूत्रार्थः अस्य। कर्तुः ईप्सिततममित्यस्य क्रियाजन्यफलाश्रयः इत्यर्थः। तथा हि कर्तुरीप्सिततमं कर्म इति सूत्रे ईप्सिततमशब्दः आप्-धातोः इच्छार्थे सन्प्रत्यये पुनः वर्तमानकालिककर्मार्थे **मतिबुद्धिपूजार्थेभ्यश्च**[5] इति सूत्रेण क्तप्रत्यये कृते निष्पन्नात् ईप्सितशब्दात् अतिशयार्थे तमप्-प्रत्ययविधानेन सिद्ध्यति। तस्य ईप्सिततमशब्दस्य योगे **क्तस्य च वर्तमाने**[6] इति सूत्रेण कर्तुरिति पदे कर्त्रर्थे षष्ठी विहिता। अतः कर्त्रा स्वव्यापारेण सम्बन्धुमिष्यमाणम् ईप्सिततमं कारकं कर्मसंज्ञं भवतीत्यर्थः आयाति। तत्र कर्तुः सम्बन्धः कर्तृविशेषणव्यापारेण एव ग्राह्यः। फलतं क्रियाजन्यफलाश्रयस्य कर्मसंज्ञा सिद्ध्यति। एवं लक्षणकरणेन **तथायुक्त चाऽनीप्सितम्**[7] इति सूत्रेण विहितस्य अनीप्सितकर्मणः अपि संग्रहो भवति यतो हि उक्तलक्षणेन

समेषामपि कर्मणां कर्मसंज्ञा सिद्ध्यति। ईप्सितत्वानीप्सितत्वयोः केवलं कर्मसंज्ञाविधाने एव उपयोगो भवति, शाब्दबोधे तयोः प्रतीतिर्नजायते। अतः वाच्यार्थकोटौ तयोः न प्रवेशः। इत्थं क्रियायाः फलस्य च धातुनैव लाभाद् आश्रय एव द्वितीयार्थः। आश्रयतायाः निरूपकाः कर्तृकर्मफलव्यापारादयः नैके भवन्ति। निरूपकणाम् अनेकत्वात् आश्रयत्वानि अपि अनेकानि भवन्ति। येन शक्तिनामपि अनेकत्वात् आश्रयत्वं शक्यतावच्छेदकं न स्यात्, अनुगतस्य एकस्यैव धर्मस्य शक्यतावच्छेद कत्वात्। अतः आश्रयत्वस्य स्वरूपमुच्यते कौण्डभट्टेन- **"तत्त्वञ्चाखण्डशक्तिरूपम-वच्छेदकम्"**[8] इति। तत्त्वम् अर्थात् आश्रयत्वम् अखण्डोपाधिरूपेण अवच्छेदकं भवति। तस्यार्थः फलाश्रयत्वेन, व्यापाराश्रयत्वेन इत्यादिरूपेण यदा आश्रयत्वं तिष्ठति तदा सखण्डोपाधिः भवति। किन्तु यदा केवलम् आश्रयः इत्युच्यते तदा आश्रय इत्यनुगतव्यवहारात् इतरपदार्थघटित- धर्मेभ्यः भिन्नत्वात् अखण्डोपाधिः भवति। एवम् आश्रयत्वस्य अखण्डोपाधित्वात् यथा बहुषु घटेषु विद्यमानं घटत्वमेकमेव तद्वद् बहुषु आश्रयेषु वर्तमानम् आश्रयत्वमेकमेव अस्ति। तस्माद् आश्रयत्वं शक्यतावच्छेदकं भवति।

ओदनं पचति इत्यत्र कर्तृनिष्ठपाकक्रियाजन्यविक्लित्तिरूप-फलाश्रयत्वात् ओदनस्य कर्मत्वं सिद्धम्। घटं करोति इत्यत्र च उत्पत्तिरूपफलाश्रयत्वात् घटस्य कर्मत्वम्। अतः कर्मणि द्वितीया इति सूत्रेण तयोः द्वितीयाविभक्तिः विहिता। घटं जानाति इत्यत्र आवरणभङ्गरूपधात्वर्थफलाश्रयत्वात् घटस्य कर्मत्वम्। ज्ञाधातोः ज्ञानजन्यमावरणभङ्गरूपफलमित्यर्थस्वीकारे भूतकालिकभविष्य-त्कालिकघटयोश्च सत्ताभावात् कस्यापि आश्रयत्वं भवितुं नार्हति। फलतः अतीतं घटं जानामि भविष्यतं घटं जानामि इत्यादिप्रयोगः अनुपपन्नः स्यात्। तस्मादेव अतीतानागतादिपरोक्षस्थलेऽपि ज्ञानजन्यावरणभङ्गरूपफलमेव ज्ञाधात्वर्थ इति स्वीकार्यम्। ननु फलाश्रयस्य कर्मत्वस्वीकारे अतीतानागतादिपरोक्षस्थले घटादीनां अविद्यमानत्वात् फलाश्रयत्वं तेषां न सिद्ध्यति, अतः कर्मसंज्ञापि न प्राप्नोतीति शङ्का क्रियते। अस्याः समाधानमुच्यते । नैयायिकैः यथा अतीतानागतादिस्थले घटादीनाम् अविद्यमानत्वेऽपि विषयता-सम्बन्धेन ज्ञानाश्रयतया कर्मत्वं स्वीक्रियते इह व्याकरणशास्त्रेऽपि तथैव स्वीक्रियते। अथवा सांख्यशास्त्रोक्तसत्कार्यवादस्य आधारेणापि कर्मत्वमुपपद्यते। तथा हि- सर्वेऽपि पदार्थाः उत्पत्तेः प्राक् सूक्ष्मरूपेण स्वीकारणे एवं वर्तन्ते। यथा मृत्तिकायां सूक्ष्मरूपेण घटो वर्तते एव दण्डचक्रादिना तस्य स्थूलरूपेण अभिव्यक्तिर्भवति। उक्तश्च भर्तृहरिणा-

**तिरोभावाऽभ्युपगमे भावानां सैव नास्तिता।**
**लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते।।**[9]

अर्थात् स्थूलवस्तुनः स्वस्य सूक्ष्मकारणे तिरोभाव एव नाश इत्युच्यते। तिरोभावसमये एव नश्यतीति प्रयोगः क्रियते। अत एव घटस्य तिरोधाने सत्यपि सूक्ष्मरूपेण स्वकारणे विद्यमानत्वाद् आवरणभङ्गरूपफलस्य आश्रयो भवत्येव तेन कर्मसंज्ञायां द्वितीयाविभक्तिरुत्पद्यते।

क्रियाजन्यफलाश्रयस्य कर्मसंज्ञा भवतीति स्वीकारे चैत्रो ग्रामं गच्छति इत्यत्र पूर्वपक्षिभिः दोष: प्रदर्श्यते। तद्यथाः चैत्रो ग्रामं गच्छति इत्यत्र क्रियाजन्यसंयोगरूपफलस्य आश्रयो यथा ग्रामः तथैव चैत्रोऽपि वर्तते, संयोगस्य द्विष्ठत्वात् । अतः फलाश्रयत्वात् चैत्रस्यापि कर्मसंज्ञाया **'चैत्रश्चचैत्र गच्छति'** इत्येवं प्रयोगापत्तिः स्यात्। एवं प्रयागतः काशी गच्छति इत्यत्र प्रयागं गच्छति इति प्रयोगापत्तिः स्यात्। यतो हि गम् धात्वर्थफलं यथा उत्तरदेशसंयोगो वर्तते तद्वत् पूर्वदेशविभागोऽपि भवति। अतः क्रियाजन्यसंयोग-रूपफलाश्रयो यथा काशी वर्तते तथैव विभागरूपफलाश्रयः प्रयागो वर्तते इत्यतः तस्यापि कर्मसंज्ञा प्राप्नोति। अस्य समाधानमुच्यते। चैत्रो ग्रामं गच्छति इत्यत्र यद्यपि फलाश्रयत्वेन ग्रामस्येव चैत्रस्यापि कर्मसंज्ञा प्राप्नोति तथापि गम्-धात्वर्थव्यापाराश्रयत्वेन तस्य कर्तृसंज्ञापि प्राप्नोति। कर्तृसंज्ञया च कर्मसंज्ञा बाध्यते कर्तृसंज्ञायाः परत्वात्। अतः कर्मसंज्ञाया अभावात् चैत्रपदे द्वितीयाविभक्तिरपि न प्राप्नोति। यतो हि कर्मणि द्वितीया इति सूत्रेण कर्मसंज्ञायामेव द्वितीया उत्पद्यते। अन्यथा कर्मसंज्ञाया अभावेऽपि यदि कर्मत्वलक्षणमात्रेण द्वितीया स्यात् तदा गमयति कृष्णं गोकुलम् इतिवद् पाचयति कृष्णेन इत्यत्रापि कृष्णपदात् द्वितीयापत्तिर्भवति, णिच्प्रत्ययार्थे विशेषणभूतस्य विक्लित्त्यनुकूल-व्यापाररूपफलस्य आश्रय कृष्णः अस्ति इति हेतोः अतः कर्मसंज्ञाभावात् चैत्रो ग्रामं गच्छति इत्यत्र चैत्रपदे न द्वितीयापत्तिः।

**कर्मणः सप्तविधत्वम्-**

कर्मकारकं सप्तविधं भवति। प्रथमतः कर्म द्विविधं भवति **इप्सितकर्म, अनीप्सितकर्म** इति। तत्र ईप्सितकर्मणः त्रयो भेदा:- **निर्वर्त्य विकार्य प्राप्यश्चेति**। अनीपिसतकर्मणश्च चत्वारो भेदा:- **उदासीनम् अनीप्सितं अकथितम् अन्यपूर्वकश्चेति।** क्रमेण एतेषां सप्तविधकर्मणां स्वरूपम् उदाहरणञ्च प्रस्तूयते-

**1. निर्वत्यकर्म-** निर्वर्त्यते निष्पाद्यते यत् तन्निर्वत्यम् । निर्वत्यकर्म तदेव उच्यते यस्य नूतनतया उत्पत्तिर्जायिते अथवा पूर्वतः विद्यमानस्य यस्य कार्यकारणभावेन प्रकाशो जायते। यथा- घटं करोति इत्यत्र घटस्य निष्पाद्यतया निर्वत्यं कर्म भवति ।

**2. विकार्यकर्म -** यस्य कर्मणः परिणामित्वेन विवक्षा क्रियते तत् विकार्यकर्म इत्युच्यते। एतच्च द्विविधं भवति **प्रकृत्युच्छेदसम्भूतं प्रकृतिगुणान्तरोत्पन्नम्।** प्रकृतेः नाशेन उत्पन्नस्य उदाहरणं भवति काष्ठ भस्मं करोति । अत्र भस्मनः प्रकृतेः काष्ठस्य नाशेन भस्म उत्पन्नम् अतः भस्म विकार्यकर्म द्वितीयस्य उदाहरणं भवति सुवर्ण कुण्डलं करोति। कुण्डलस्य प्रकृतिः वर्तते सुवर्ण तस्यैव रूपपरिवर्तनेन कुण्डलम् उत्पन्नम्। अतः कुण्डल विकार्यकर्म भवति।

**3. प्राप्यकर्म-** यत्र दर्शनाद् अनुमानाद्वा क्रियाकृतविशेषो न जायते तत् प्राप्यकर्म इत्युच्यते । यथा- देवदत्तः घटं पश्यति । देवदत्तः ग्रामं गच्छति । अत्र देवदत्तस्य दर्शनक्रियया गमनक्रियया वा घटे अथवा ग्रामे किमपि परिवर्तन न जायते।

**4. उदासीनकर्म-** अनिच्छया प्राप्तकर्म उदासीनकर्म इत्युच्यते। यथा- ग्रामं गच्छन् तृणं स्पृशति । अत्र तृणम् उदासीनकर्म भवति।

**5. अनीप्सितकर्म-** कर्तुः यद् अत्यन्तमनिष्टं द्वेष्यं वा भवति तदेव अनीप्सितकर्म इत्युच्यते। यथा- विषं भुङ्क्ते ।

**6. अकथितकर्म-** अपादानादिभिः अविवक्षित कारकम् अकथितकर्म इत्युच्यते । यथा- गां दोग्धिपयः। गोः अपादानत्वेन अविवक्षायां कर्मसंज्ञा अत्र सिद्ध ।

**7. अन्यपूर्वककर्म-** यत्र अधिकरणादिसंज्ञान्तरप्राप्तिरस्ति किन्तु अध्यादिपूर्वकशीङादिधातोः आधारेण सूत्रविशेषेण कर्मसंज्ञा विधीयते तत् अन्यपूर्वककर्म इत्युच्यते। यथा- अधिशेते वैकुण्ठं हरिः।

**सहायक ग्रन्थसूची-**


1. वैयाकरणभूषणसारः (सावित्रीहिन्दीव्याख्यापेतः) । मिश्रः, आया- प्रसादः (सम्पा०)। वाराणसी: सम्पूर्णानन्दसंस्कृतविश्व- विद्यालयः। 1998
2. अष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः)। दीक्षित, पुष्पा। नवदेहलीःसंस्कृतभारती। 2010
3. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीसहिता)। शर्मा परमेश्वरानन्दः (सम्पा०)। वाराणसी: मोतिलालबनारसी- दासः। 2010
4. वैयाकरणभूषणसारः (प्रभादर्पणव्याख्याद्वयोपेतः)। पञ्चोली, बालकृष्णः (सम्पा०)। वाराणसी : चौखम्बासंस्कृतसंस्थानम्। 2006
5. व्याकरणमहाभाष्यम् (प्रदीपोद्योत भावबोधिनीहिन्दीव्याख्या- समुल्लसितम्)।त्रिपाठी, जयशङ्करलाल (सम्पा०)। वाराणसी: कृष्णदासअकादेमी। 2013
6. वाक्यपदीयम्। मिश्रः सुधाकरः (सम्पा०)। कलकाता: बनारस मार्केन्टाइल कम्पनी। 2015


**सङ्केतसूची-**

1. वा.प. – वाक्यपदीयम्
2. अ.सू. – अष्टाध्यायीसूत्रम्
3. वै.भूष. – वैयाकरण भूषणसारः
4. म.भा. – महाभाष्यम्

**सन्दर्भ ग्रन्थः :-**

[1] वैयाकरणसिद्धान्तकारिका-पृ 241

[2] म.भा- 1.4.21

[3] अ.सू. – 2.3.2

[4] अ.सू. – 1.4.49

[5] अ.सू. – 3.2.18

[6] अ.सू. – 2.3.67

[7] अ.सू. – 1.4.50

[8] वै.भूष.- पृ.149

[9] वा.प.- 3.1.38